# Badararajna Kritam Manikyadevi Stotram

# बदरराज्ञा कृतं माणिक्यादेवीस्तोत्रम्

## Document Information

Text title : Badararajna Kritam Manikyadevi Stotram

File name : badararAjnAkRRitaMmANikyAdevIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 3/49-56||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# बदरराज्ञा कृतं माणिक्यादेवीस्तोत्रम्

इत्युक्तो बदरो राजा तुष्टाव परमेश्वरीम् ।
माणिक्यां श्रीं महामुक्तानिकां श्रीबालयोगिनीम् ॥ ४९॥

नमश्चराचरस्थायै चमत्कारमयीश्रियै ।
नारायण्यै ह्यभेदायै बालकृष्णाङ्गयोषिते ॥ ३.५०॥

नमः श्रीपुरुषोत्तम्यै हरिण्यै ब्रह्मयोषिते ।
नमोऽनादिकृष्णनारायणाङ्गनायै ते नमः ॥ ५१॥

नमो माणिक्यवर्णायै धारिण्यै श्रीहरेर्नमः ।
नमः श्रीकृष्णकान्तायै पारब्राह्म्यै नमो नमः ॥ ५२॥

भक्तकार्यातिसम्पादयित्र्यै मात्रे नमो नमः ।
प्रसन्ना भव देवेशि हेमानलप्रशान्तये ॥ ५३॥

महासुरोऽयं श्रीकान्तामृते मृधो न जायते ।
त्वं मातस्तन्मर्दनं वै कुरु देवार्थसाधिके ॥ ५४॥

नमस्तस्यै सर्वहन्त्र्यै रक्षयित्र्यै च ते नमः ।
महानारायणपत्न्यै माणिक्यायै च ते नमः ॥ ५५॥

एवमभ्यर्थ्य तां शक्तिं हृदा पूजां चकार सः ।
अर्पयामास पुष्पाणि माणिक्याचरणे तदा ॥ ५६॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः तिष्यसन्तानात्मकस्य चतुर्थखण्डे
तृतीयाध्यायन्तर्गतं बदरराज्ञा कृतं माणिक्यादेवीस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ४। अध्याय ३/४९-५६॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 3/49-56..

Proofread by PSA Easwaran

*Badararajna Kritam Manikyadevi Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*